# shivarAmAShTakam

# શિવરામાષ્ટકમ્

## Document Information

Text title : shivarAmAShTakam

File name : shivarAmAShTakam.itx

Category : shiva, raama, aShTaka

Location : doc_shiva

Author : Traditional

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Description-comments : From Brihatstotraratnakara with 408 stotras

Latest update : June 10, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 12, 2023

*sanskritdocuments.org*

# શિવરામાષ્ટકમ્

શ્રીગણેશાય નમઃ ।
શિવ હરે શિવરામસખે પ્રભો ત્રિવિધતાપનિવારણ હે પ્રભો ।
અજ જનેશ્વર યાદવ પાહિ માં શિવ હરે વિજયં કુરુ મે વરમ્ ॥ ૧॥

કમલલોચન રામ દયાનિધે હર ગુરો ગજરક્ષક ગોપતે ।
શિવતનો ભવ શઙ્કર પાહિ માં શિવ હરે વિજયં કુરુ મે વરમ્ ॥ ૨॥

સ્વજનરઞ્જનમઙ્ગલમન્દિરં ભજતિ તે પુરુષાઃ પરમં પદમ્ ।
ભવતિ તસ્ય સુખં પરમાદ્ભુતં શિવ હરે વિજયં કુરુ મે વરમ્ ॥ ૩॥

જય યુધિષ્ઠિરવલ્લભ ભૂપતે જય જયાર્જિત પુણ્યપયોનિધે ।
જય કૃપામય કૃષ્ણ નમોઽસ્તુ તે શિવ હરે વિજયં કુરુ મે વરમ્ ॥ ૪॥

ભવવિમોચન માધવ માપતે સુકવિમાનસહંસ શિવારતે ।
જનકજારત રાઘવ રક્ષ માં શિવ હરે વિજયં કુરુ મે વરમ્ ॥ ૫॥

અવનિમણ્ડલમઙ્ગલ માપતે જલદસુન્દર રામ રમાપતે ।
નિગમકીર્તિગુણાર્ણવ ગોપતે શિવ હરે વિજયં કુરુ મે વરમ્ ॥ ૬॥

પતિતપાવન નામમયી લતા તવ યશો વિમલં પરિગીયતે ।
તદપિ માધવ માં કિમુપેક્ષસે શિવ હરે વિજયં કુરુ મે વરમ્ ॥ ૭॥

અમરતાપરદેવ રમાપતે વિજયસ્તવ નામધનોપમે ।
મયિ કથં કરુણાર્ણવ જાયતે શિવ હરે વિજયં કુરુ મે વરમ્ ॥ ૮॥

હનુમતઃ પ્રિયતોષકર પ્રભો સુરસરિદ્ધૃતશેખર હે ગુરો ।
મમ વિભો કિમુ વિસ્મરણં કૃતં શિવ હરે વિજયં કુરુ મે વરમ્ ॥ ૯॥

નરહરે રતિરઞ્જનસુન્દરં પઠતિ યઃ શિવરામકૃતસ્તવમ્ ।
વિશતિ રામરમાચરણામ્બુજે શિવ હરે વિજયં કુરુ મે વરમ્ ॥ ૧૦॥

પ્રાતરુત્થાય યો ભક્ત્યા પઠેદેકાગ્રમાનસઃ ।

વિજયો જાયતે તસ્ય વિષ્ણુમારાધ્યમાપ્નુયાત્ ॥ ૧૧॥

ઇતિ શ્રીરામાનન્દવિરચિતં શિવરામસ્તોત્રમ્ ।

Proofread by Nat Natarajan nat.natarajan at gmail.com, NA

*shivarAmAShTakam*

pdf was typeset on March 12, 2023

Please send corrections to *sanskrit@cheerful.com*